# सत्यनारायण-व्रत-कथा

## प्रथमोऽध्यायः

### सत्यनारायण-विप्र-संवाद-वर्णनम्

व्यास उवाच
एकदा नैमिषारण्ये ऋषयः शौनकादयः।
प्रपच्छुर्मुनयः सर्वे सूतं पौराणिकं खलु॥ १

ऋषय ऊचुः
व्रतेन तपसा [1]वाऽपि प्राप्यते वाञ्छितं फलम्।
[2]तत्सर्वं श्रोतुं इच्छामः कथयस्व महामुने!॥ २

श्रीसूत उवाच
[3]नारदेनैव संपृष्टो भगवान् कमलापतिः।
सुरर्षये [4]यथा प्राह तच्छृणुध्वं समाहिताः॥ ३

एकदा नारदो योगी परानुग्रह-काङ्क्षया।[5]
पर्यटन् विविधाँ-ल्लोकान् मर्त्य-लोकं उपागतः॥ ४

[6]ततो दृष्ट्वा जनान् सर्वान् नाना-क्लेश-समन्वितान्।
नाना-योनि-समुत्पान्नान् क्लिश्यमानान् स्वकर्मभिः॥ ५

---

[1] (अ,उ) किं वा (इ) वाऽपि

[2] (इ) सर्वं तत्

[3] (इ) नारदेनैवं उक्तः सः

[4] (अ,उ) यथैवाह (इ) यथा प्राह

[5] (इ) परानुग्रह-काम्यया

[6] (इ) ततो दृष्टा जनाः सर्वे नानादुःखसमन्विताः। नानायोनिसमुत्पन्नाः क्लिश्यन्ते पापकर्मभिः

केनोपायेन चैतेषां दुःख-नाशो भवेद् ध्रुवम्।
इति संचिन्त्य मनसा विष्णु-लोकं गतस्तदा॥ ६

तत्र नारायणं देवं शुक्ल-वर्णं चतुर्भुजम्।
शङ्ख-चक्र-गदा-पद्म-वनमाला-विभूषितम्॥ ७
दृष्ट्वा तं देव-देवेशं [7]स्तोतुं समुपचक्रमे।

नारद उवाच
[8]नमो वाङ्मनसातीत-रूपायाऽनन्तशक्तये।
आदि-मध्यान्त-हीनाय निर्गुणाय गुणात्मने॥ ८

सर्वेषां आदि-भूताय भक्तानां आर्ति-नाशिने।
श्रुत्वा स्तोत्रं ततो विष्णुर्नारदं प्रत्यभाषत॥ ९

श्रीभगवान् उवाच
किमर्थं आगतोऽसि त्वं किं ते मनसि वर्तते।
कथयस्व महाभाग! तत्सर्वं कथयामि ते॥ १०

नारद उवाच
मर्त्य-लोके जनाः सर्वे नाना-क्लेश-समन्विताः।
नाना-योनि-समुत्पन्नाः पच्यन्ते पाप-कर्मभिः॥ ११

[9]तत् कथं शमयेन् नाथ! लघूपायेन तद् वद।
श्रोतुं इच्छामि तत्सर्वं कृपाऽस्ति यदि ते मयि॥ १२

श्रीभगवान् उवाच
साधु पृष्टं त्वया वत्स! लोकानुग्रह-काङ्क्षया।[10]
यत् कृत्वा मुच्यते मोहात् तच्छृणुष्व वदामि ते॥ १३

---

[7] (इ) वक्तुं

[8] (इ) नमस्ते वाङ्मनोऽतीत°

[9] (इ) तत् सर्वं शमयेत् – इति पाठभेदः

[10] (इ) लोकानुग्रहकाम्यया

व्रतं अस्ति महत्पुण्यं स्वर्गे मर्त्ये च दुर्लभम्।[11]
तव स्नेहान्-मया वत्स! प्रकाशः क्रियतेऽधुना॥ १४

सत्यनारायणस्येदं[12] व्रतं सम्यग्-विधानतः।
[13]कृत्वा सद्यः सुखं भुक्त्वा परत्र मोक्षं आप्नुयात्॥ १५
तच्छ्रुत्वा भगवद्-वाक्यं नारदो मुनिरब्रवीत्॥[14]

नारद उवाच
किं फलं किं विधानं च कृतं केनैव तद्-व्रतम्॥[15] १६
तत् सर्वं विस्तराद्-ब्रूहि कदा कार्यं हि तद्-व्रतम्।[16]

श्रीभगवान् उवाच
दुःख-शोकादि-शमनं धन-धान्य-प्रवर्धनम्॥ १७
सौभाग्य-सन्तति-करं सर्वत्र विजय-प्रदम्।
यस्मिन् कस्मिन् दिने मर्त्यो भक्ति-श्रद्धा-समन्वितः॥ १८

सत्यनारायणं देवं [17]यजेत् तुष्टो निशा-मुखे।
ब्राह्मणैर्बान्धवैश्चैव सहितो धर्म-तत्परः॥ १९

नैवेद्यं भक्तितो दद्यात् [18]प्रसादं भक्ष्यं उत्तमम्।
रम्भा-फलं घृतं क्षीरं गोधूमस्य च चूर्णकम्॥ २०

अभावे शालि-चूर्णं वा [19]शर्करा वा गुडस्तथा।
[20]सपादं सर्वभक्ष्याणि [21]चैकीकृत्य निवेदयेत्॥ २१

---

[11] स्वर्गे भुवि सुदुर्लभम्

[12] (अ) एवम् (इ) एतत् (उ) इदम्

[13] (इ) कृत्वा सम्यक् सुखं भुक्त्वा परे मोक्षं अवाप्नुयात्।

[14] (इ) नारदः पुनरब्रवीत्

[15] (इ) कृतं वा केन तद्-व्रतम्

[16] (इ) कदा कार्यं व्रतं हि तत्

[17] (अ,उ) जयेच्चैव (इ) यजेत् तुष्टो

[18] (इ) सपादम्

[19] (अ,उ) शर्करां वा गुडं तथा।

[20] (इ) प्रसादं

विप्राय दक्षिणां दद्यात् कथां श्रुत्वा जनैः सह।
[22]ततश्च बन्धुभिः सार्धं विप्रांश्च प्रतिभोजयेत्॥ २२

[23]प्रसादं भक्षयेद्-भक्त्या नृत्य-गीतादिकं चरेत्।
[24]ततः स्तुत्वा गृहं गच्छेत् सत्यनारायणं स्मरन्॥ २३

एवं कृते मनुष्याणां वाञ्छा-सिद्धिर्भवेद्-ध्रुवम्।
विशेषतः कलि-युगे लघूपायोऽस्ति भू-तले॥ २४

इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः प्रथमोऽध्यायः

# द्वितीयोऽध्यायः

[25]भगवान् उवाच
[26]अथान्यत् संप्रवक्ष्यामि कृतं येन पुरा द्विज।
कश्चित् काशीपुरे रम्ये ह्यासीद्-विप्रोऽतिनिर्धनः॥[27] १

[28]क्षुत्तृड्भ्यां व्याकुलो भूत्वा नित्यं बभ्राम भूतले।
दुःखितं ब्राह्मणं दृष्ट्वा भगवान् ब्राह्मण-प्रियः॥ २

[29]वृद्ध-ब्राह्मण-रूपस्तं पप्रच्छ द्विजं आदरात्।
किमर्थं भ्रमसे विप्र! महीं नित्यं सुदःखितः॥[30] ३
तत्सर्वं श्रोतुं इच्छामि कथ्यतां द्विजसत्तम!।[31]

---

[21] (इ) एकीकृत्य

[22] (इ) ततश्च बन्धुभिः सार्धं विप्रेभ्यः प्रतिपादयन्

[23] (इ) सपादम्

[24] (अ,इ) ततश्च स्वगृहं गच्छेत् (इ) ततः स्तुत्वा गृहं गच्छेत्

[25] (अ) सूत उवाच

[26] कथां अस्य प्रवक्ष्यामि कृत-कृत्यो भवेत् द्विज!। इति पाठभेदः

[27] ग्रामे आसीद्-विप्रश्च निर्धनः। इति पाठभेदः

[28] क्षुत्-तृष्णा-व्याकुलो भूत्वा सततं भ्रमते महीम्।

[29] वृद्ध-ब्राह्मण-रूपेण ॰ इति पाठभेदः

[30] महीं कृत्स्नां सुदुःखितः। इति पाठभेदः

[31] कथ्यतां यदि रोचते। इति पाठभेदः

ब्राह्मण उवाच

ब्राह्मणोऽतिदरिद्रोऽहं भिक्षार्थं वै भ्रमे महीम्॥[32] ४

उपायं यदि जानासि कृपया कथय प्रभो!।

वृद्ध-ब्राह्मण उवाच

सत्यनारायणो विष्णुर्वाञ्छितार्थ-फल-प्रदः॥ ५

[33]तस्य त्वं पूजनं विप्र! कुरुष्व व्रतं उत्तमम्।

यत् कृत्वा सर्वदुःखेभ्यो मुक्तो भवति मानवः॥ ६

(श्रीभगवान् उवाच)

[34]विधानं च व्रतस्यापि विप्रायाऽऽभाष्य यत्नतः।

सत्यनारायणो वृद्धस्तत्रैवान्तरधीयत॥ ७

[35] तद्-व्रतं सङ्करिष्यामि यदुक्तं ब्राह्मणेन वै।

इति संचिन्त्य विप्रोऽसौ रात्रौ निद्रां न लब्धवान्॥ ८

ततः प्रातः समुत्थाय सत्यनारायण-व्रतम्।

[36]करिष्य इति सङ्कल्प्य भिक्षार्थं अगमत् द्विजः॥ ९

तस्मिन्नेव दिने विप्रः प्रचुरं द्रव्यं आप्तवान्।

तेनैव बन्धुभिः सार्धं सत्यस्य व्रतं आचरत्॥ १०

सर्व-दुःख-विनिर्मुक्तः सर्व-सम्पत्-समन्वितः।

बभूव स द्विज-श्रेष्ठो व्रतस्यास्य प्रभावतः॥ ११

ततः प्रभृति कालं च मासि मासि व्रतं कृतम्।

[37]एवं नारायणस्येदं व्रतं कृत्वा द्विजोत्तमः॥ १२

---

[32] भिक्षार्थं भ्रमणं मम। इति पाठभेदः

[33] तस्य त्वं द्विजशार्दूल! – इति पाठभेदः

[34] विधानं च व्रतस्याऽस्य – इति पाठभेदः

[35] ततोऽसौ मनसा विप्रश्चिन्तयामास ईश्वरम्। व्रतं नारायणेनोक्तं विदित्वा मन्दिरं ययौ॥ ततोऽहं तत् करिष्यामि व्रतं मनसि चिन्तितम्। इति निश्चित्य विप्रो ° – इति पाठभेदः

[36] करिष्येऽहं च सङ्कल्प्य सिद्धार्थं अगमत् द्विज। इति पाठभेदः

[37] एवं नारायणस्येतद्-व्रतं ज्ञात्वा ° – इति पाठभेदः

सर्व-पाप-विनिर्मुक्तो दुर्लभं मोक्षं आप्तवान्।
[38]व्रतं अस्य यदा विप्रा! पृथिव्यां संकरिष्यति॥ १३
[39]तदैव सर्व-दुःखं तु मनुजस्य विनश्यति।

(सूत उवाच)
एवं नारायणेनोक्तं नारदाय महात्मने॥ १४
[40]मया तत्कथितं विप्राः किं अन्यत् कथयामि वः।

## विप्रकाष्ठकेतुसम्वादवर्णनम्

ऋषय ऊचुः
[41]तस्माद्-विप्राच्-छ्रुतं केन पृथिव्यां चरितं मुने।
तत्सर्वं श्रोतुं इच्छामः श्रद्धाऽस्माकं प्रजायते॥ १५

सूत उवाच
श्रृणुध्वं मुनयः सर्वे व्रतं येन कृतं भुवि।[42]
एकदा स द्विज-वरो यथाविभवविस्तरैः॥ १६

बन्धुभिः स्वजनैः सार्धं व्रतं कर्तुं समुद्यतः।
एतस्मिन्नन्तरे काले काष्ठक्रेता समागमत्॥[43] १७

बहिः काष्ठं च संस्थाप्य विप्रस्य गृहं आययौ।[44]
तृष्णया पीडितात्मा च दृष्ट्वा विप्रं कृत-व्रतम्॥[45] १८

प्रणिपत्य द्विजं प्राह किं इदं क्रियते त्वया।
कृते किं फलं आप्नोति विस्तराद् वद मे प्रभो॥ १९

---

[38] वरतं एतद्-यदा विप्र! पृथिव्यां संचरिष्यति। इति पाठभेदः
[39] तदैव सर्व-दुःखं हि मानवानां विनश्यति
[40] मयाऽपि कथितं विप्राः॰ – इति पाठभेदः
[41] तस्माद्-विप्राद्-व्रतं केन॰ – इति पाठभेदः
[42] तस्माद्-येन कृतं भुवि – इति पाठभेदः
[43] काष्ठकेतुः समागतः। इति पाठभेदः
[44] विप्रस्य मन्दिरं ययौ। इति पाठभेदः
[45] तृष्णया पीडितो भूत्वा विप्रं दृष्ट्वा तथाविधम्। इति पाठभेदः

विप्र उवाच

सत्यनारायणस्येदं व्रतं सर्वेप्सित-प्रदम्।
(दुःख-दारिद्र्य-शमनं पुत्र-पौत्र-विवर्धनम्।)
तस्य प्रसादान्-मे सर्वं धन-धान्यादिकं महत्॥ २०

[46]तस्माद् एतद् व्रतं ज्ञात्वा काष्ठ-क्रेताऽतिहर्षितः।
पपौ जलं प्रसादं च भुक्त्वा च नगरं ययौ॥[47] २१

सत्यनारायणं देवं मनसा इत्यचिन्तयत्।[48]
[49]काष्ठ-विक्रयतो ग्रामे प्राप्यते चाद्य यद् धनम्॥ २२

तेनैव सत्य-देवस्य करिष्ये व्रतं उत्तमम्।
इति सञ्चिन्त्य मनसा काष्ठं धृत्वा तु मस्तके॥ २३

[50]जगाम नगरे रम्ये धनिनां यत्र संस्थितिः।
तद्दिने काष्ठ-मूल्यं च द्विगुणं प्राप्तवान् असौ॥ २४

ततः प्रसन्न-हृदयः सुपक्वं कदली-फलम्।
[51]शर्करा-घृत-दुग्धं च गोधूमस्य च चूर्णकम्॥ २५

[52]कृत्वैकत्र सपादं च गृहीत्वा स्वगृहं ययौ।
ततो बन्धून् समाहूय चकार विधिना व्रतम्॥ २६

[53]तद् व्रतस्य प्रभावेण धन-पुत्रान्वितोऽभवत्।
इह-लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ॥ २७

इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः द्वितीयोऽध्यायः

---

[46] ततस्तद्-वचनं श्रुत्वा काष्ठ-हर्त्ताऽतिहर्षितः। इति पाठभेदः

[47] भुक्त्वा तन्-नगरं ययौ। इति पाठभेदः

[48] देवं चिन्तयन् स्थिरमानसः। इति पाठभेदः

[49] काष्ठं विक्रीय नगरे प्राप्स्यामि चाद्य यद्-धनम्। इति पाठभेदः

[50] जगाम नगरं रम्यम्° – इति पाठभेदः

[51] शर्कराम् – ईत् पाठभेदः

[52] प्रत्येकं तु प्रसादं च गृहीत्वा स्वपुरं ययौ। इति पाठभेदः

[53] तद्-व्रतस्य प्रसादेन° – इति पाठभेदः

# तृतीयोऽध्यायः

## नानाख्यानैः सह वणिक्-साधू-मोक्षवर्णनम्

सूत उवाच

[54]पुनरग्रे प्रवक्ष्यामि श्रृणुध्वं मुनिसत्तमाः।
[55]पुरा उल्कामुखो नाम नृपश्चासीन् महामतिः॥ १

जितेन्द्रियः सत्यवादी ययौ देवालयं प्रति।
दिने दिने धनं दत्त्वा द्विजान् सन्तोषयत् सुधीः॥ २

[56]भार्या तस्य प्रमुग्धा च सरोज-वदना सती।
[57]भद्र-शीला नदी-तीरे सत्यस्य व्रतं आचरत्॥ ३

[58]एतस्मिन्नन्तरे तत्र साधुरेकः समागतः।
[59]वाणिज्यार्थं बहुधनैरनेकैः परिपूरिताम्॥ ४

नावं संस्थाप्य तत्-तीरे जगाम नृपतिं प्रति।[60]
[61]दृष्ट्वा स व्रतिनं भूपं प्रपच्छ विनयान्वितः॥ ५

साधुरुवाच

[62]किं इदं कुरुषे राजन्! भक्ति-युक्तेन चेतसा।
प्रकाशं कुरु तत्सर्वं श्रोतुं इच्छामि साम्प्रतम्॥ ६

---

[54] पुनरन्यत् प्रवक्ष्यामि श्रृणुध्वं मुनिपुङ्गवाः। – इति पाठभेदः

[55] आसीद्-उल्कामुखो नाम नृपतिर्बलिनां वरः। – इति पाठभेदः

[56] तस्य भार्या० – इति पाठभेदः

[57] भद्रशीला व्रतं सत्यं सिन्धुतीरेऽकरोन्-मुने!। इति पाठभेदः

[58] एतस्मिन्नेव समये० – इति पाठभेदः

[59] वाणिज्यार्थं बहुविधैर्रत्नाद्यैः परिपूरिताम्। -- इति पाठभेदः

[60] जगाम तत्-तटं प्रति। इति पाठभेदः

[61] दृष्ट्वा तत्र व्रतं सम्यक्० – इति पाठभेदः

[62] किं इदं क्रियते० – इति पाठभेदः

राजोवाच
पूजनं क्रियते साधो! विष्णोरतुल-तेजसः।
व्रतं च स्वजनैः सार्धं पुत्राद्यावाप्ति-काम्यया॥[63] ७

[64]भूपस्य वचनं श्रुत्वा साधुः प्रोवाच सादरम्।
सर्वं कथय मे राजन्! करिष्येऽहं तवोदितम्॥ ८

ममाऽपि सन्ततिर्नास्ति ह्येतस्माज्जायते ध्रुवम्।[65]
ततो निवृत्य वाणिज्यात् सानन्दो गृहं आगतः॥[66] ९

[67]भार्यायै कथितं सर्वं व्रतं सन्तति-दायकम्।
तदा व्रतं करिष्यामि यदा मे सन्ततिर्भवेत्॥ १०

इति लीलावतीं प्राह पत्नीं साधुः स सत्तमः।
[68]एकस्मिन् दिवसे तस्य भार्या लीलावती सती॥ ११

[69]भर्तृ-युक्ताऽऽनन्द-चित्ताऽभवद् धर्म-परायणा।
[70]गर्भिणी साभवत् तस्य भार्या सत्य-प्रसादतः॥ १२

[71](पूर्णे गर्भे ततो जाता बालिका चातिसुन्दरी।)
दशमे मासि वै तस्याः कन्या-रत्नं अजायत।
[72]दिने दिने सा ववृधे शुक्ल-पक्षे यथा शशी॥ १३

---

63 °सार्धं पूजादिप्राप्तये मया। इति पाठभेदः
64 प्रत्युवाच ततो नत्वा राजानं सादरं वचः। साङ्गं कथय मे राजन्! व्रतं एतत् करोम्यहम्॥
65 °नास्ति एतस्माद्-भविता ध्रुवम्। इति पाठभेदः
66 °सानन्दं गृहं आययौ। इति पाठभेदः
67 पाठान्तरे भार्यायै ° साधुः स सत्तमः इति भागः न दृश्यते
68 कियद्-दिने तस्य भार्याऽभवद्-गर्भवती सती
69 गर्भ-युक्ता° इति पाठभेदः
70 गर्भिणी ° रत्नमजायत इति भागः कुत्रचित् न दृश्यते
71 (इ)
72 दिने दिने वर्धमाना° – इति पाठभेदः

[73](ततो वणिक् सुतायाश्च जातकादीन् समाप्य च।)
नाम्ना कलावती चेति तन्-नामकरणं कृतम्।

ततो लीलावती प्राह स्वामिनं मधुरं वचः॥ १४
न करोषि किमर्थं वै पुरा सङ्कल्पित-व्रतम्।[74]

साधुरुवाच
विवाह-समये त्वस्याः करिष्यामि व्रतं प्रिये!॥ १५

इति भार्यां समाश्वास्य जगाम नगरं प्रति।[75]
ततः कलावती कन्या ववृधे पितृ-वेश्मनि॥[76] १६

दृष्ट्वा कन्यां ततः साधुर्नगरे सखिभिः सह।[77]
मन्त्रयित्वा द्रुतं दूतं प्रेषयामास धर्मवित्॥ १७

विवाहार्थं च कन्यायाः वरं श्रेष्ठं विचारय[78]।
[79]तेनाऽऽज्ञप्तश्च दूतोऽसौ काञ्चनं नगरं ययौ॥ १८

तस्मादेकं वणिक्-पुत्रं समादायाऽऽगतो हि सः।
दृष्ट्वा तु सुन्दरं बालं वणिक्-पुत्रं गुणान्वितम्॥ १९

ज्ञातिभिर्बन्धुभिः सार्धं परितुष्टेन चेतसा।
दत्तावान् साधु पुत्राय कन्यां विधि-विधानतः॥ २०

ततोऽभाग्य-वशात् तेन विस्मृतं व्रतं उत्तमम्।
[80]विवाह-समये तस्यास्तेन रुष्टोऽभवत् प्रभुः॥ २१

---

[73] (इ)
[74] किमर्थं वा पुरा यच्-च प्रति-श्रुतम्। इति पाठभेदः
[75] °जगाम तत्-तटं प्रति। इति पाठभेदः
[76] °वर्धिता पितृ-वेश्मनि। इति पाठभेदः
[77] °बन्धुभिः सह। इति पाठभेदः
[78] °विचारयन्। इति पाठभेदः
[79] तेनाऽऽज्ञप्तः ततः सोऽसौ काञ्चनं° – इति पाठभेदः
[80] °समयेऽप्यस्याः ° ऽभवत् विभुः। इति पाठभेदः

ततः कालेन कियता निज-कर्म-विशारदः।[81]
[82]वाणिज्याय गतः शीघ्रं जामातृ-सहितो वणिक्॥ २२

रत्नसार-पुरे रम्ये गत्वा सिन्धु-समीपतः।
[83]वाणिज्यं अकरोत् साधुर्जामात्रा श्रीमता सह॥ २३

[84]तौ गतौ नगरे रम्ये चन्द्रकेतोर्नृपस्य च।
एतस्मिन्नेव काले तु सत्यनारायणः प्रभुः॥ २४

भ्रष्ट-प्रतिज्ञं आलोक्य शापं तस्मै प्रदत्तवान्।
[85]दारुणं कठिनं चास्य महद्-दुखं भविष्यति॥ २५

[86]एकस्मिन् दिवसे राज्ञो धनं आदाय तस्करः।
[87]तत्रैव चागतश्चोरो वणिजौ यत्र संस्थितौ॥ २६

[88]तत्पश्चाद् धावकान् दूतान् दृष्टवा भीतेन चेतसा।
धनं संस्थाप्य तत्रैव स तु शीघ्रं अलक्षितः॥[89] २७

ततो दूताः समायाता यत्राऽऽस्ते सज्जनो वणिक्।
[90]दृष्ट्वा नृप-धनं तत्र बद्धाऽऽवेतौ वणिक्-सुतौ॥ २८

[91]हर्षेण धावमानाश्च प्रोचुर्नृप-समीपतः।
तस्करौ द्वौ समानीतौ विलोक्याऽऽज्ञापय प्रभो!॥ २९

---

[81] °निज-धर्म-विशारदः। इति पाठभेदः।
[82] वाणिज्यार्थं ° जामात्रा सहितो° – इति पाठभेदः
[83] वाणिज्यं कुरुते° इति पाठभेदः
[84] पुरीं निर्माय नगरं चन्द्रकेतु-नृपस्य च (?) इति पाठभेदः
[85] आद्यारभ्यमियत् (?) कालं दुःखस्तेऽत्र भविष्यते। इति पाठभेदः।
[86] तस्मिन् एव दिने° – इति पाठभेदः
[87] तेनैव वर्त्मनाऽऽयातः पृष्ठदेशं विलोकयन्। इति पाठभेदः
[88] स पश्चात् धावतो दूतान्° – इति पाठभेदः
[89] °तत्रैव गतः शीघ्रं° – इति पाठभेदः
[90] दृष्ट्वा भूप-धनं तत्र बद्धा दूता वणिक्-सुतौ। इति पाठभेदः
[91] हर्ष-युक्ता धावमानाः ऊचुर्नृप-समीपतः। इति पाठभेदः

[92]राज्ञाऽऽज्ञप्तास्ततः शीघ्रं दृढं बद्धा तु तावुभौ।
स्थापितौ द्वौ महादुर्गे [93]कारा-गृहेऽविचारतः॥ ३०

मायया सत्य-देवस्य न श्रुतं च तयोर्वचः।
अतस्तयोर्धनं [94]राज्ञा गृहीतं चन्द्रकेतुना॥ ३१

तच्छापाच्च तयोर्गेहे भार्या चैवातिदुःखिता।[95]
चौरेणापहृतं सर्वं गृहे यच्च स्थितं धनम्॥ ३२

आधि-व्याधि-समायुक्ता क्षुत्पिपासातिदुःखिता।[96]
अन्न-चिन्ता-परा भूत्वा [97]बभ्राम च गृहे गृहे॥ ३३

[98]कलावती तु कन्याऽपि बभ्राम प्रति-वासरम्।
[99]एकस्मिन् दिवसे याता क्षुधार्ता द्विज-मन्दिरम्।
गत्वाऽपश्यद् व्रतं तत्र सत्यनारायणस्य च[100]॥ ३४

उपविश्य कथां श्रुत्वा वरं प्रार्थितवत्यपि।[101]
प्रसाद-भक्षणं कृत्वा ययौ रात्रौ गृहं प्रति॥ ३५

[102]माता कलावतीं कन्यां कथयामास प्रेमतः।
पुत्रि! रात्रौ स्थिता कुत्र किं ते मनसि वर्तते॥ ३६

[103]कन्या कलावती प्राह मातरं प्रति सत्वरम्।
द्विजालये व्रतं मात दृष्टं वाञ्छित-सिद्धिदम्॥ ३७

---

[92] तेनाऽऽज्ञप्तैः ततः॰ – इति पाठभेदः
[93] कारा-गारे इति पाठभेदः।
[94] ॰धनं यच्च गृहीतं॰ इति पाठभेदः
[95] ॰भार्याऽपि दुःखिताऽभवत्। इति पाठभेदः
[96] ॰क्षुत्पिपासा-प्रपीडिता। इति पाठभेदः
[97] भ्रमते इति पाठभेदः
[98] ततः कलावती कन्या॰ – इति पाठभेदः
[99] एकदा सा तु भवनात्॰ – इति पाठभेदः
[100] वा
[101] वरं संप्रार्थ्य वाञ्छितम्।
[102] ततो लीलावतीकन्यां भर्त्सयामास तां भृशम्।
[103] पाठः कुत्रचित् न दृश्यते

तच्-छ्रुत्वा कन्यका-वाक्यं व्रतं कर्तुं समुद्यता।
[104]सा मुदा तु वणिग्-भार्या सत्यनारायणस्य च॥ ३८

व्रतं चक्रे सैव साध्वी बन्धुभिः स्वजनै सह।
भर्तृ-र्जामातरौ क्षिप्रं आगच्छेतां स्वं आश्रमम्॥[105] ३९

[106](इति देवं वरं याचे सत्यदेवं पुनः पुनः।)
[107]अपराधं च मे भर्तु→र्जामातुः क्षन्तुं अर्हसि।
[108]व्रतेना←नेन तुष्टोऽसौ सत्यनारायणः प्रभुः॥ ४०

दर्शयामास स्वप्नं हि चन्द्रकेतुं नृपोत्तमम्।
[109]बन्धिनौ मोचय प्रातर्वणिजौ नृप-सत्तम॥ ४१

देयं धनं च तत्सर्वं गृहीतं यत्त्वयाऽधुना।[110]
नो चेत् त्वां नाशयिष्यामि सराज्यं धन-पुत्रकम्॥ ४२

एवं आभाष्य राजानं ध्यान-गम्योऽभवत् प्रभुः।
ततः प्रभात-समये राजा च स्वजनैः सह॥ ४३

उपविश्य सभा-मध्ये प्राह स्वप्नं जनं प्रति।[111]
बद्धौ महाजनौ शीघ्रं मोचय द्वौ[112] वणिक्-सुतौ॥ ४४

इति राज्ञो वचः श्रुत्वा मोचयित्वा महाजनौ।
समानीय नृपस्याऽग्रे [113]प्राहुस्ते विनयान्विताः॥ ४५

---

[104] ससुता सा॰

[105] ॰ममाऽऽश्रमम्।

[106] (इ)

[107] अपराधं तु भर्तुर्मे॰

[108] व्रतेन तस्यास्तुष्टो॰

[109] बन्दी तौ॰

[110] ॰तत्सर्वं विधिना द्विगुणीकृतम्।

[111] ॰प्राह दूत-जनं प्रति।

[112] मोचयध्वम्

[113] प्रोचुस्ते

आनीतौ द्वौ वणिक्-पुत्रौ मुक्तौ निगड-बन्धनात्।
ततो महाजनौ नत्वा चन्द्रकेतुं नृपोत्तम्॥ ४६

[114]स्मरन्तौ पूर्व-वृत्तान्तं नो चतुर्भय-विह्वलौ।
राजा वणिक्-सुतौ वीक्ष्य वचः प्रोवाच सादरम्॥[115] ४७

[116]देवात् प्राप्तं महद्-दुःखं इदानीं नास्ति वै भयम्।
[117]तदा निगड-संत्यागं क्षौर-कर्माद्यकारयत्॥ ४८

[118]वस्त्रालङ्कारकं दत्त्वा पारितोष्य नृपश्च तौ।
पुरस्कृत्य वणिक्-पुत्रौ वचमातोषयद्-भृशम्॥ ४९

पुराऽऽनीतं तु यद्-द्रव्यं द्विगुणी-कृत्य दत्तवान्।
प्रोवाच तौ ततो राजा गच्छ साधो! निजाश्रमम्॥ ५०

राजानं प्रणिपत्याह गन्तव्यं त्वत्प्रसादतः।[119]
इत्युक्त्वा तौ महावैश्यौ जग्मतुः स्वगृहं प्रति॥ ५१

इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः तृतीयोऽध्यायः

# चतुर्थोऽध्यायः

सूत उवाच
[120]यात्रां तु कृतवान् साधुर्मङ्गलायन-पूर्विकाम्।
ब्राह्मणेभ्यो धनं दत्त्वा तदा तु नगरं ययौ॥[121] १

---

114 स्मृत्वा च पूर्व-वृत्तान्तं विस्मयाद्-भय-विह्वलौ।

115 °प्रोवाच सादरं वचः।

116 °महत् कष्टं° नास्ति तद्भयम्।

117 इदानीं एव मुक्तस्त्वं क्षुर-कर्मादिकं चर।

118 ततो नृप-वरः श्रीमान् स्वर्ण-रत्न-विभूषणैः। अलङ्कृत्य वणिक्-पुत्रौ वचसाऽप्रीणयद्-भृशम्।

119 °तत्प्रसादतः।

120 यात्रां कृत्वा ततः साधुर्मङ्गलाचार-पूर्विकाम्।

121 °सहर्षी नगरं ययौ।

[122]कियद्-दूरं गते साधौ सत्यनारायणः प्रभुः।
जिज्ञासां कृतवान् – साधो! किमस्ति तव नौ-स्थितम्॥[123] २

ततो महाजनौ मत्तौ हेलया च प्रहस्य वै।
कथं पृच्छसि भो दण्डिन्! मुद्रां नेतुं किं इच्छसि॥ ३

लता-पत्रादिकं चैव वर्तन्ते[124] तरणौ मम।
निष्ठुरं च वचः श्रुत्वा सत्यं भवतु ते वचः॥ ४

एवं उक्त्वा गतः शीघ्रं दण्डी तस्य समीपतः।
[125]कियद्-दूरं ततो गत्वा स्थितः सिन्धुसमीपतः॥ ५

गते दण्डिनि साधुश्च कृत-नित्य-क्रियस्तदा।
उत्थितां [126]तरणिं दृष्ट्वा विस्मयं परमं ययौ॥ ६

[127]दृष्ट्वा लतादिकं चैव मूर्च्छितो न्यपतद्-भुवि।
लब्ध-संज्ञो वणिक्-पुत्रस्ततश्चिन्तान्वितोऽभवत्॥[128] ७

[129]तदा तु दुहितुः कान्तो वचनं चेदं अब्रवीत्।
[130]किमर्थं क्रियते शोकः शापो दत्तश्च दण्डिना॥ ८

शक्यते तेन सर्वं हि कर्तुं चात्र न संशयः।[131]
अतस्तच्छरणं यामो वाञ्छितार्थो भविष्यति॥ ९

---

122 कियद्-दूरे॰

123 ॰किं अस्ति तरणौ तव।

124 वर्तते

125 कुत्रचित् न दृश्यते

126 ॰औकसां दृष्ट्वा॰

127 लता-पत्रादिकं दृष्ट्वा॰

128 ॰ततश्चिन्तापरोऽभवत्।

129 अथवा अस्मिन् अर्धे – जामातोवाच – इति मन्यन्ते केचित्

130 किमर्थं कुरुषे शोकं शापाद्-एतच्-च दण्डिनः।

131 ॰कर्तुं हर्तुं न संशयः।

[132]जामातुर्वचनं श्रुत्वा तत्सकाशं गतस्तदा।
दृष्ट्वा च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम्॥ १०

क्षमस्व चापराधं मे यदुक्तं तव सन्निधौ।
(मया दुरात्मना देव मुग्धोऽहं तव मायया।
यद् उक्तं तद्वचो नाथ! दुष्टं मे क्षन्तुं अर्हसि।

यतः पर-कृपाः सर्वे क्षमा-सारा हि साधवः।)
[133]एवं पुनः पुनर्नत्वा महा-शोका-कुलोऽभवत्॥ ११

[134]प्रोवाच वचनं दण्डी विलपन्तं विलोक्य च।
मा रोदीः शृणु मद्-वाक्यं मम पूजा-बहिर्मुखः॥[135] १२

[136]ममाज्ञया च दुर्बुद्धे! लब्धं दुःखं मुहुर्मुहुः।
तच्छ्रुत्वा भगवद्-वाक्यं स्तुतिं कर्तुं समुद्यतः॥ १३

साधुरुवाच
त्वन्-माया-मोहिताः सर्वे ब्रह्माद्यास्त्रिदिवौकसः।
न जानन्ति [137]गुणान् रूपं तवाश्चर्यं इदं प्रभो!॥ १४

मूढोऽहं त्वां कथं जाने मोहितस्तव मायया।
प्रसीद पूजयिष्यामि यथाविभवविस्तरैः॥ १५

[138]पुरा वित्तं च तत्सर्वं त्राहि मां शरणागतम्।
श्रुत्वा भक्ति-युतं वाक्यं परितुष्टो जनार्दनः॥ १६

---

[132] जामातुश्च वचः श्रुत्वा°

[133] पुनः पुनस्तदा नत्वा रुरोद शोक-विह्वलः।

[134] तं उवाच ततो दण्डी°

[135] °मम पूजा-पराङ्मुखः।

[136] मां अवज्ञाय दुर्बुद्धे!°

[137] °गुणं रूपं°

[138] पुत्रं वित्तं च मे देहि°

वरं च वाञ्छितं दत्त्वा तत्रैवान्तर्दधे हरिः।[139]
[140]ततो नावं समारुह्य दृष्ट्वा वित्त-प्रपूरिताम्॥ १७

कृपया सत्य-देवस्य सफलं वाञ्छितं मम।[141]
इत्युक्त्वा स्वजनैः सार्धं पूजां कृत्वा यथाविधि॥ १८

[142]हर्षेण चाभवत् पूर्णः सत्यदेव-प्रसादतः।
नावं संयोज्य यत्नेन स्व-देश-गमनं कृतम्॥[143] १९

[144]साधुर्जामातरं प्राह पश्य रत्न-पुरीं मम।
दूतं च प्रेषयामास निज-वित्तस्य रक्षकम्॥ २०

ततोऽसौ नगरं गत्वा साधुभार्यां विलोक्य च।
[145]प्रोवाच वाञ्छितं वाक्यं नत्वा बद्धाञ्जलिस्तदा॥ २१

निकटे नगरस्यैव जामात्रा सहितो वणिक्।
आगतो बन्धुवर्गैश्च वित्तैश्च बहुभिर्युतः॥[146] २२

श्रुत्वा दूत-मुखाद्-वाक्यं महा-हर्षवती सती।[147]
सत्य-पूजां ततः कृत्वा प्रोवाच तनुजां प्रति॥ २३

व्रजामि शीघ्रं आगच्छ साधु-संदर्शनाय च।
इति मातृ-वचः श्रुत्वा व्रतं कृत्वा समाप्य च॥ २४

[148]प्रसादं च परित्यज्य गता साऽपि पतिं प्रति।
तेन रुष्टः सत्य-देवो भर्तारं तरणीं तथा॥ २५

---

139 °तत्रैवान्तरधीयत।

140 ततोऽसौ नावं आरुह्य दृष्ट्वा रत्नादि-पूरिताम्।

141 °यत्फलं वाञ्छितं मम।

142 हर्षेण महता साधुः प्रयाणं चाकरोद् द्विजाः!।

143 °संयोज्य वेगेन स्वदेशं अगमत् तदा।

144 ततो जामातरं प्राह पश्य वत्स! पुरीं मम।

145 उवाच°

146 °धनैर्बहुविधैस्तथा।

147 °महा-हर्ष-युता सती।

148 प्रसादं संपरित्यज्य गता सा च पतिं प्रति।

संहृत्य च धनैः सार्धं जले तस्यावमज्जयत्।[149]
ततः कलावती कन्या न विलोक्य निजं पतिम्॥[150] २६

शोकेन महता तत्र रुदती चापतद्-भुवि।
[151]दृष्ट्वा तथाविधां नावं कन्या च बहु-दुःखिताम्॥ २७

[152]भीतेन मनसा साधुः किं आश्चर्यं इदं भवेत्।
[153]चिन्त्यमानाश्च ते सर्वे बभूवुस्तरि-वाहकाः॥ २८

[154]ततो लीलावती कन्यां दृष्ट्वा सा विह्वलाऽभवत्।
विललापातिदुःखेन भर्तारं चेदं अब्रवीत॥ २९

इदानीं नौकया सार्धं कथं सोऽभूद्-अलक्षितः।[155]
[156]न जाने कस्य देवस्य हेलया चैव सा हृता॥ ३०

सत्यदेवस्य माहात्म्यं ज्ञातुं वा केन शक्यते।[157]
[158]इत्युक्त्वा विललापैव ततश्च स्वजनैः सह॥ ३१

ततो लीलावती कन्यां क्रोडे कृत्वा रुरोद ह।[159]
ततः कलावती कन्या नष्टे स्वामिनि दुःखिता॥ ३२

गृहीत्वा पादुके तस्यानुगन्तुं च मनोदधे।
कन्यायाश्चरितं दृष्ट्वा सभार्यः [160]सज्जनो वणिक्॥ ३३

---

[149] °जले तस्मिन् समार्जयत्।

[150] °नालोक्य वणिजं पतिम्।

[151] दृष्ट्वा तथाविधां कन्यां तद्-दृष्ट्वा तत्पतिं तरीम्।

[152] भयेन महता° इदं महत्।

[153] विचिन्तयन्तस्ते सर्वे°

[154] °लीलावती साध्वी° विह्वला सती।

[155] अदृश्योऽभूद्-अलक्षितः।

[156] न जाने केन दैवेन हेलया वाऽपहारितम्।

[157] °किं ज्ञातुं न हि शक्यते।

[158] इत्युक्त्वा विललायाऽथ तत्रास्था स्वजनैः सह।

[159] ° रुरोद च।

[160] स्वजनो

अतिशोकेन संतप्तश्चिन्तयामास धर्मवित्।
[161]हृतं वा सत्यदेवेन भ्रान्तोऽहं सत्यमायया॥ ३४

सत्य-पूजां करिष्यामि यथाविभवविस्तरैः।
इति सर्वान् समाहूय कथयित्वा मनोरथम्॥ ३५

[162]नत्वा च दण्डवद् भूमौ सत्य-देवं पुनः पुनः।
ततस्तुष्टः सत्य-देवो दीनानां परिपालकः॥[163] ३६

जगाद वचनं चैनं कृपया भक्त-वत्सलः।[164]
[165]त्यक्त्वा प्रसादं ते कन्या पतिं द्रष्टुं समागता॥ ३७

[166]अतोऽदृष्टोऽभवत् तस्याः कन्यकायाः पतिर्ध्रुवम्।
गृहं गत्वा प्रसादं च भुक्त्वा साऽऽयाति चेत् पुनः॥[167] ३८

लब्ध-भर्तृ-सुता साधो! भविष्यति न संशयः।
[168]कन्यका तादृशं वाक्यं श्रुत्वा गगन-मण्डलात॥ ३९

क्षिप्रं तदा गृहं गत्वा प्रसादं च भुभोज सा।[169]
[170]सा पश्चात् पुनरागम्य ददर्श स्वजनं पतिम्॥ ४०

ततः कलावती कन्या[171] जगाद पितरं प्रति।
[172]इदानीं च गृहं याहि विलम्बं कुरुषे कथम्॥ ४१

---

161 हृतो हि सत्य-देवेन जामाता सत्यमायया।

162 नमाम दण्डवद् भूमौ॰

163 ॰गगनाद् वणिजं प्रति।

164 ॰चेदं नैवेद्यं अवमन्य च।

165 कुत्रचित् न दृश्यते।

166 आगता स्वामिनं द्रष्टुं अतोऽदृश्योऽभवत् प्रभुः।

167 ॰चायातु सा पुनः।

168 ततः सा प्राणदं वाक्यम्॰

169 ॰प्रसादं प्रतिभुज्य च।

170 अपश्यत् पुनरागत्य पतिं नावं जनैः सह।

171 तुष्टा

172 एहि तात! गृहे यामो॰

तच्छ्रुत्वा कन्यका-वाक्यं संतुष्टोऽभूद्-वणिक्-सुतः।
पूजनं सत्य-देवस्य कृत्वा विधि-विधानतः॥ ४२

धनैर्बन्धुगणैः सार्धं जगाम निज-मन्दिरम्।
पौर्णमास्यां च सङ्क्रान्तौ कृतवान् सत्य-पूजनम्॥[173] ४३

[174]इहलोके सुखं भुक्त्वा चान्ते सत्य-पुरं ययौ।
[175]अवैष्णवानाम् अप्राप्यं गुण-त्रय-विर्वजितम्॥ ४४

इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः चतुर्थोऽध्यायः

# पञ्चमोऽध्यायः

सूत उवाच
[176]अथान्यच्च प्रवक्ष्यामि श्रृणुध्वं मुनि-सत्तमाः।
[177]आसीत तुङ्गध्वजो राजा प्रजा-पालन-तत्परः॥ १

प्रसादं सत्य-देवस्य त्यक्त्वा दुःखं अवाप सः।
एकदा स वनं गत्वा हत्वा बहु-विधान् पशून्॥[178] २

आगत्य वट-मूलं च दृष्ट्वा सत्यस्य पूजनम्।
गोपाः कुर्वन्ति सन्तुष्टा भक्ति-युक्ताः सबान्धवाः॥ ३

राजा दृष्ट्वा तु दर्पेण [179]न गत्वा न ननाम सः।
ततो गोप-गणाः सर्वे प्रसादं नृप-सन्निधौ॥ ४

संस्थाप्य पुनरागत्यं भुक्त्वा सर्वे यथेप्सितम्।
ततः प्रसादं संत्यज्य राजा दुःखं अवाप सः॥ ५

---

[173] सङ्क्रान्त्यां पूजां कृत्वा यथाविधि।

[174] इहलोके सुखी भूत्वा॰

[175] अवैष्णवानां इति अर्धं कुत्रचित् एव दृश्यते

[176] अथ चान्यत्॰

[177] आसीत् वंशध्वजो राजा॰

[178] ॰बहु-विधान् मृगान्।

[179] (इ) नागत्य न नाम सः। (उ) न गत्वा तं ननाम सः – इति पाठभेदः

तस्य पुत्र-शतं नष्टं धन-धान्यादिकं च यत्।
सत्य-देवेन तत्सर्वं नाशितं मम निश्चितम्॥ ६

अतस्तत्रैव गच्छामि यत्र देवस्य पूजनम्।
[180]मनसा तु विनिश्चित्य ययौ गोपाल-सन्निधौ॥ ७

ततोऽसौ सत्य-देवस्य पूजां गोप-गणैः सह।
भक्ति-श्रद्धान्वितो भूत्वा चकार विधिना नृपः॥ ८

सत्य-देव-प्रसादेन धन-पुत्रान्वितोऽभवत्।
इह-लोके [181]सुखं भुक्त्वा चान्ते सत्य-पुरं ययौ॥ ९

य इदं कुरुते सत्य-व्रतं परम-दुर्लभम्।
श‍ृणोति च कथां पुण्यां भक्ति-युक्तः फल-प्रदाम्॥[182] १०

धन-धान्यादिकं तस्य भवेत् सत्य-प्रसादतः।
दरिद्रो लभते वित्तं [183]बद्धो मुच्येत बन्धनात्॥ ११

भीतो भयात् प्रमुच्येत सत्यं एव न संशयः।[184]
ईप्सितं च फलं भुक्त्वा चान्ते सत्य-पुरं व्रजेत्॥ १२

इति वः कथितं विप्राः! सत्यनारायण-व्रतम्।
यत् कृत्वा सर्व-दुःखेभ्यो मुक्तो भवति मानवः॥ १३

विशेषतः कलि-युगे सत्य-पूजा फल-प्रदा।[185]
[186]केचित् कालं वदिष्यन्ति सत्यं ईशं तं एव च॥ १४

सत्यनारायणं केचित् सत्य-देवं तथापरे।
नाना-रूप-धरो भूत्वा सर्वेषां ईप्सित-प्रदः॥ १५

---

[180] मनसैव॰

[181] ॰सुखी भूत्वा॰

[182] ॰भुक्ति-मुक्ति-फल-प्रदाम्।

[183] (उ) बद्धौ मुच्येत बन्धनात्।

[184] ॰सत्यं एतन्न संशयः।

[185] ॰सत्य-पूजा महा-फला।

[186] कुत्रचित् न दृश्यते

भविष्यति कलौ सत्य-व्रत-रूपी सनातनः।
[187]श्रीविष्णुना धृतं रूपं सर्वेषां ईप्सित-प्रदम्॥ १६

य इदं पठते नित्यं श्रृणोति मुनि-सत्तमाः।
तस्य नश्यन्ति पापानि सत्य-देव-प्रसादतः॥ १७

[188]व्रतं यत्तु कृतं पूर्वं सत्यनारायणस्य च।
तेषां त्वपरजन्मानि कथयामि मुनीश्वराः॥ १८

सदानन्दो महाप्राज्ञः सुदामा ब्राह्मणो ह्यभूत।
तस्मिन् जन्मनि श्रीकृष्णं ध्यात्वा मोक्षं अवाप ह॥ १९

काष्ठ-भारवहो भिल्लो गुहराजो बभूव ह।
तस्मिन् जन्मनि संसेव्य रामं मोक्षं जगाम वै॥ २०

उल्कामुखो महाराजो नृप-दशरथोऽभवत्।
श्रीरङ्गनाथं संपूज्य श्री वैकुण्ठं तदाऽगमत्॥ २१

धार्मिकः सत्यसन्धश्च साधुर्मोरध्वजोऽभवत्।
देहार्धं क्रकचैश्छित्त्वा दत्वा मोक्षं अवापह॥ २२

तुङ्गध्वजो महाराजः स्वायंभुरभवत्किल।
सर्वान् भागवतान् कृत्वा श्री वैकुण्ठं तदाऽगमत्॥ २३

इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः पञ्चमोऽध्यायः

*****

॥ शुभम् भूयात् ॥

# पत्रऋणम्

(अ) http://sanskritdocuments.org/all_pending/satyanaaraayaNa.itx
(इ) http://sanskritdocuments.org/scannedbooks/Satyanarayana.PDF
(उ) शंकर-सुब्राय-जोशिना प्रकाशितं श्रीसत्यनारायण-पूजा-कथा
(ऋ) चल्ला लक्ष्मीनरसिंह-शास्त्रिणा सत्यनारयणव्रतकल्पमु (తెలు )

[187] कुर्त्रचित् एव दृश्यते (उ)

[188] व्रतं यस्तु इत्यारभ्य कथान्त-पर्यन्तं कुत्रचित् एव दृश्यते